International Journal of Sanskrit Research 2019; 5(2): 05-11

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(2): 05-11
© 2019 IJSR
www.anantaajournal.com
Received: 10-01-2019
Accepted: 16-02-2019

**Sri Nootalapati Radheswar**
Saivagama Adhyapaka,
S.V. Veda Vijnanapeetham
Dharmagiri, Tirumala
Andhra Pradesh, India

**Correspondence:**
**Sri Nootalapati Radheswar**
Saivagama Adhyapaka,
S.V. Veda Vijnanapeetham
Dharmagiri, Tirumala
Andhra Pradesh, India

# शैवागमे नित्यपूजाप्रायश्चित्तनिरूपणम्

Sri Nootalapati Radheswar

## प्रस्तावना

शैवागमेषु बह्व्यः क्रियाः नित्य-नैमित्तिक-काम्य-पूजाविषयेषु प्रोक्ताः। क्रियासु वैपरीत्ये दोषाः स्युरिति आगममतम्। तदर्थमुत्पन्ना एव प्रायश्चित्तक्रियाः। अस्मिन् शोधपत्रे नित्यपूजाविहीने कीदृशं प्रायश्चित्तं करणीयमिति जिज्ञासया – 1.अजित-2.कारण-3अंशुमत्-4.मकुट-5.वीरागमेषु 6.सन्तानसंहितायां च प्रोक्तं प्रायश्चित्तं किमिति सुस्पष्टं पट्टिकारूपेण प्रादर्शि।

### 1.अजितागमे नित्यपूजाविहीने -

अजितागमस्य तृतीयभागे, प्रायश्चित्तविधिर्नाम षट् सप्ततितमपटले नित्यपूजाविहीने प्रायश्चित्तानि परमेश्वरेण इत्थं प्रोक्तानि –

नित्यपूजाविहीने तु स्थानभ्रंशो भवेत्सदा। एकसन्धिविहीने तु चान्यत्र द्विगुणं भवेत्।। 80 ।।
संधिद्वयार्चने हीने शान्तिहोमं तु कारयेत्। गुणसंधिविहीने च पञ्चगव्येन सेचयेत्।। 81 ।।
एकाहेऽत्र विहीने तु स्नपनं कारयेत्ततः। अहोरात्रादिपञ्चाहे स्नपनं शान्तिहोमकम्।। 82 ।।
पक्षहीने दिशाहोमं स्नपनं चात्र कारयेत्। मासादूर्ध्वं विहीने तु जलसंप्रोक्षणं कुरु।। 83 ।।[1]

नित्यपूजाविहीने स्थानचलनं निश्चयं सम्भवति। एककालविहीने तत्र पूजां द्विगुणं कारयेत्। द्विसन्धिकालेऽर्चने विहीने शान्तिहोमं कुर्यात्।

---

[1]. अजिते - तृतीयभागे, 76 पटले प्रायश्चित्तविधौ, श्लो. 80 - 84

गुणसन्धिविहीने तु पञ्चगव्येन प्रोक्षयेत्। एकाहे विहीने स्नपनं कारयेत्। अहोरात्रादि पञ्चाहे विहीने स्नपनम् आचार्यशान्तिहोमं कारयेत्। पक्षे पूजायां हीने दिशाहोमं कृत्वा स्नपनं कारयेत्। मासादुपरि नित्यपूजाविहीने जलसंप्रोक्षणं कारयेत्।

| अजितागमे नित्यपूजाविहीने | | | |
|---|---|---|---|
| **क्र.सं.** | **निमित्तम्** | **प्रायश्चित्तम्** | **सम्भविष्यमाणनष्टम्** |
| 1. | एकसन्ध्यायाम् अर्चने हीने | अन्यत्र सन्ध्यायां द्विगुणार्चनम् | स्थानचलनं भवति |
| 2. | सन्धिद्वये अर्चनाहीने | शान्तिहोमः | |
| 3. | गुणसन्धिविहीने | पञ्चगव्येन सेचनम् | |
| 4. | अहोरात्रहीने | स्नपनम् | |
| 5. | अहोरात्रादि-पञ्चाहहीने (1-5) | शान्तिहोमः, स्नपनञ्च | |
| 6. | पक्षे अर्चनाहीने (6-15) | दिशाहोमः, स्नपनञ्च | |
| 7. | मासादूर्ध्वम् अर्चनाहीने | जलसम्प्रोक्षणम् | |

**2. पूर्वकारणागमे –**

**पूर्वकारणागमे प्रायश्चित्तविधिनामके 144 पटले नित्यपूजाविहीने इत्थं प्रायश्चित्तं प्रोक्तम् -**

> स्थानभ्रंशो भवेद्राज्ञो नित्यपूजाविहीनके। तस्यां संध्यां विहीनायां द्विगुणं चान्यसंधिके।।
> संधिद्वयार्चनाहीने शान्तिहोमं तु कारयेत्। पक्षहीने दिशाहोमं स्नपनं तत्र कारयेत्।।
> पञ्चाहे स्नपनं कुर्यान्मूर्तिहोमं तु कारयेत्। संधित्रयविहीने च कुर्याद्गव्याभिषेचनम्।।
> अहोरात्रविहीने तु स्नपनं शान्तिहोमयुक्।मासादूर्ध्वविहीने तु जलसंप्रोक्षणं कुरु।।[2]

**नित्यपूजाविहीनेन राज्ञः स्थानभ्रंशः स्यात्।**

1. सन्धिकाले पूजाविहिने - अन्यसन्धिकाले नित्यपूजा द्विगुणम् आचरेत्।
2. सन्धिद्वये नित्यपूजाविहीने - शान्तिहोमम् आचरेत्।
3. पक्षे नित्यपूजाविहीने विहीने - दिशाहोमं स्नपनं कारयेत्।
4. पञ्चाहे विहीने - स्नपनं कृत्वा, मूर्तिहोमं आचरेत्।
5. सन्धित्रये पूजाविहीने - पञ्चगव्यैः प्रोक्षणम् आचरेत्।
6. अहोरात्रपूजाविहीने तु - स्नपनं कृत्वा शान्तिहोमं आचरेत्।
7. मासपर्यन्तं मासादूर्ध्वं पूजाविहीने - अवश्यं जलसंप्रोक्षणं तत्र आचरेत्।।

[2]. पूर्वकारणे, 144 तमपटले प्रायश्चित्तविधौ, श्लो. 93 - 96

| पूर्वकारणे नित्यपूजाविहीने | | | |
|---|---|---|---|
| **क्र.सं.** | **निमित्तम्** | **प्रायश्चित्तम्** | **सम्भविष्यमाणनष्टम्** |
| 1. | तत्सन्ध्यायां विहीनायाम् | अन्यसन्ध्यायां द्विगुणार्चनम् | राज्ञः स्थानभ्रंशः भवेत्। |
| 2. | सन्धिद्वये अर्चनाहीने | शान्तिहोमः | |
| 3. | सन्धित्रयविहीने | पञ्चगव्येन अभिषेचनम् | |
| 4. | अहोरात्रहीने | शान्तिहोमः, स्नपनम् | |
| 5. | पञ्चाहे अर्चनाहीने (1-5) | मूर्तिहोमः, स्नपनञ्च | |
| 6. | पक्षे अर्चनाहीने (6-15) | दिशाहोमः, स्नपनञ्च | |
| 7. | मासादूर्ध्वम् अर्चनाहीने | जलसम्प्रोक्षणम् | |

**3. अंशुमदागमे –**

**अजितागमस्य प्रायश्चित्तविधिनामक 76 पटलस्य टिप्पण्याम् अंशुमदागमे नित्यपूजाविहीने इत्थं प्रायश्चित्तं प्रोक्तम् -**

नित्यपूजाविहीनं चेत्तद्राष्ट्रं च विनश्यति। तद्दोषशमनार्थाय स्नपनं पञ्चविंशतिः।।
दिवा सन्ध्यार्चनाहीने तद्राष्ट्रे रोगसम्भवः। मूलमन्त्रं शतं जप्त्वा शर्वर्यां द्विगुणं यजेत्।।
एकाहस्य विहीने तु तद्राष्ट्रे कलहो भवेत्। स्नानमेकोनपञ्चाशच्छान्तिहोमं तु कारयेत्।।
द्वितीयाहे तृतीयाहे चतुर्थाहे विशेषतः। महामार्यः प्रवर्तन्ते तद्राष्ट्रे कलहो भवेत्।।
तद्दोषशमनार्थाय स्नानमष्टोत्तरं शतम्। पञ्चाहादिदशाहान्तं यजने च विहीनके।।
तद्राष्ट्रस्य विनाशस्तु राजा दुर्भयमाप्नुयात्। पञ्चशुद्धिक्रमं कृत्व स्नपनमष्टोत्तरं शतम्।।
एकादशाहपक्षान्तं यजने च विहीनके। महामार्यः प्रवर्तन्ते तद्राष्ट्रे कलहो भवेत्।।
तद्दोषशमनार्थाय संप्रोक्षणमथाचरेत्। द्विमासाद्यष्टमासान्तं नित्यपूजाविहीनके।।
भूपतिस्त्वन्यथा चैव महामारी प्रवर्तते। चतुः शताष्टकलशैः स्नापयेत्परमेश्वरम्।
नवमासादि वर्षान्तं पूजाहीने तु संभवे।। परराष्ट्राद्भयं राज्ञो भूपतिस्त्वन्यथा भवेत्।
पञ्चशुद्धिक्रमं कृत्वा सहस्रकलशैः क्रमात्।।[3]

**नित्यपूजा नास्ति चेत् राजा राष्ट्रं च विनश्यति। तद्दोषनिवारणार्थं पञ्चविंशति कलशैः स्नपनमाचरेत्।**

1. अहोरात्रौ पूजाहीने च - तद्राष्ट्रस्य रोगसम्भवात् मूलमन्त्रं शतवारं जप्त्वा शर्वर्यां द्विगुणं यजेत्।
2. एकाहस्य पूजाविहीने - राष्ट्रे कलहसंभवादिनिमित्ते एकोनपञ्चाशत् कलशस्नपनं कृत्वा शान्तिहोमम् आचरेत्।
3. द्वितीये तृतीये चतुर्थे नित्यपूजाविहीने तु - महामारी संभवात् तद्राष्ट्रे कलहो जायते। तद्दोष-निवारणार्थम् अष्टोत्तरशतकलशैः स्नापयेत्।
4. पञ्चदिनादिदशदिनान्तं पूजा यजनमपि विहीने - तद्राष्ट्रस्य विनाशः एवं राजा च दुर्भयमाप्नुयात्। अतः पञ्चशुद्धिक्रमेण आचार्यः अष्टोत्तरशतकलशैः स्नापयेत्।
5. एकादशात् पञ्चादशदिन-पर्यन्तं नित्यपूजायजने च विहीने - तद्राष्ट्रे कलहोत्पद्यते, महामारी च प्रवर्तते। अतः तद्दोषनिवारनार्थं संप्रोक्षणं कुर्यात्।
6. द्विमासादूर्ध्वम् अष्टमासपर्यन्तं नित्यपूजाविहीनं चेत् - तद्देशभूपतेः परिणामः भवति, महामारी च प्रवर्तते। अतः चतुश्शताष्टकलशैः परमेश्वरस्य स्नपनं कारयेत्।
7. नवमासप्रभृति संवत्सरान्तं नित्यपूजाहीने तु - परराष्ट्रात् राज्ञः भयं, यजमानस्य अन्यथाभावो वा सम्भविष्यति अतः पञ्चशुद्धिक्रमं कृत्वा सहस्रकलशैः देवं संस्नापयेत्।।

---

[3]. अजितागमस्य तृतीयभागस्य 76 तमपटलस्य प्रायश्चित्तविधेः टिप्पण्यां पुटः 169

| अंशुमदागमे नित्यपूजाविहीने राज्ञः राष्ट्रस्य च विनाशः भवेत्। अतः 25 कलशैः स्नपनमाचरेत्। | | | |
|---|---|---|---|
| **क्र.सं.** | **निमित्तम्** | **प्रायश्चित्तम्** | **सम्भविष्यमाणनष्टानि** |
| 1. | दिवासन्ध्यार्चना हीने | मूलमन्त्रस्य शतवारं जापः, शर्वर्यां द्विगुणयजनञ्च | राष्ट्रे रोगः सम्भविष्यति। |
| 2. | | शान्तिहोमः, एकोनपञ्चाशत् कलशैः स्नपनम् | राष्ट्रे कलहः उत्पद्यते। |
| 3. | एकाहे अर्चनाहीने | अष्टोत्तरशतकलशैः स्नपनम् | राष्ट्रे महामारी, कलहश्च जायते। |
| 4. | द्वितीयाहे, तृतीयाहे, चतुर्थाहे अर्चनाहीने | पञ्चशुद्धिक्रमं कृत्वा, अष्टोत्तर-शतकलशैः स्नपनम् | राष्ट्रे विनाशः, राजा च दुर्भयं आप्नुयात्। |
| 5. | पञ्चाहादि – दशाहान्तम् | सम्प्रोक्षणम् | राष्ट्रे महामारी, कलहश्च जायते। |
| 6. | 5-10 अहे अर्चनाहीने | चतुश्शताष्ट (408) कलशैः स्नपनम् | भूपतिस्त्वन्यथा, महामारी च प्रवर्तते। |
| 7. | 11-15 अहे अर्चनाहीने | पञ्चशुद्धिक्रमं कृत्वा, सहस्त्रकलशैः स्नपनम् | राज्ञः परराष्ट्राद् भयम्, भूपतिस्त्वन्था भवेत्। |

**4. मकुटागमे –**

**अजितागमस्य प्रायश्चित्तविधिनामक 76 पटलस्य टिप्पण्यां मकुटागमे नित्यपूजाविहीने इत्थं प्रायश्चित्तं प्रोक्तम् -**

पूजाकाले परिभ्रंशे तत्संध्या द्विगुणा भवेत्। एकसंध्यार्चनाहीने हृन्मन्त्रेणशताहुतिः।।
नैवेद्यं पायसान्नं तु पुनः कुर्याच्छिवार्चनम्। एकाहे त्वर्चनाहीने स्नपनं नवकुम्भकम्।।
द्व्यहेत्र्यहेऽर्चनाहीने पञ्चविंशतिकुम्भकम्।।
नैवेद्यं च गुलान्नं तु पूर्ववत्पूजयेच्छुभम्। विशेषादर्चनं कुर्याच्छिवमन्त्र शताहुतिम्।।
चतुर्थाहे तु पञ्चाहे पूजाहानिसमन्विते। पञ्चाशत्संख्यया चैव कलशस्नपनं क्रमात्।।
षड्दिनादिदशाहान्तं कृत्वैकाशीतिकुम्भकम्। एकादशादिपक्षान्तं पूजाहीने तु संभवे।।
कृत्वा तत्र शिवाग्नि तु स्नपनं च शताष्टकैः। पूर्ववत्पूजनं कुर्यान्नैवेद्यं द्विगुणं भवेत्।।
शिखामन्त्रं शतं हुत्वा पायसान्नं निवेदयेत्। पूजाहानौ तु मासान्तं कलशानां शतत्रयम्।।
हृन्मन्त्रैश्च शतं हुत्वा क्षीरान्नं च निवेदयेत्। द्विमासमर्चनाहीने सहस्त्रकलशान्क्रमात्।।
षण्मासार्चनाहानौ तत्र संप्रोक्षणं चरेत्।[4]

1. नित्यपूजायाः परिभ्रंशे - समयपालनाभावे अपरसन्ध्यायां द्विगुणम् अर्चनं कुर्यात्।
2. एकसन्ध्याकाले पूजाविहीने - हृन्मन्त्रेण शताहुतिं जहुयात्। निवेदनार्थम् पायसान्नं निवेद्य पुनः शिवाराधनम् आचरेत्।
3. एकाहे तु अर्चनाहीने - नवकुम्भेन स्नपनं कुर्यात्।
4. द्विदिने त्रिदिने वा अर्चनाहीने - पञ्चविंशतिकुम्भैः स्नपनं कुर्यात्। गुडान्नं निवेदनं कृत्वा पूर्ववत् शिवम् अर्चयेत्। शिवमन्त्रेण शताहुतिं हुत्वा विशेषार्चनं कुर्यात्।

[4]. अजितागमस्य तृतीयभागस्य 76 तमपटलस्य प्रायश्चित्तविधेः टिप्पण्यां पुटः 169

5. चतुर्थदिनात् पञ्चमदिनपर्यन्तं पूजाहानिः संभवति चेत् - पञ्चाशत् संख्यया कलशस्नपनं क्रमादाचरेत्।
6. षट् दिनप्रभृति दशदिनपर्यन्तं पूजाहीने - एकाशीतिकुम्भैः संस्नापयेत्।
7. एकादशादिपक्षान्तं हीने चेत् - तत्र शिवाग्निं कल्पयित्वा, शताष्टकैः कुम्भैः स्नपनं कुर्यात्। पूर्ववत् विशेषेण शम्भुम् अर्चयित्वा द्विगुणं निवेदयेत्। शिखामन्त्रेण शतवारं हुत्वा पायसान्नं निवेदयेत्।
8. मासपर्यन्तं पूजाहीनौ तु - शतत्रयकुम्भैः संस्नापयेत्। हृन्मन्त्रेण शतवारं हुत्वा, निवेदनार्थं क्षीरान्नं गृण्हीयात्।
9. द्विमासपर्यन्तम् अर्चनाहानौ - सहस्रकलशैः स्नपनम् (सम्प्रोक्षणम्) आचरेत्।।

| मकुटागमे नित्यपूजाविहीने परिभ्रंशः भवेत्। तत्सन्ध्याकाले द्विगुणार्चनम्। | | | |
|---|---|---|---|
| **क्र.सं.** | **निमित्तम्** | **प्रायश्चित्तम्** | **नैवेद्यम्** |
| 1. | एकसन्ध्यार्चनाहीने | अन्यसन्ध्यायां द्विगुणार्चनम्, हृन्मन्त्रेण शताहुतिः, शिवार्चनञ्च | पायसान्नम् |
| 2. | एकाहे अर्चनाहीने | नवकलशैः स्नपनम् | ----- |
| 3. | द्व्यहे त्र्यहे (2-3) अर्चनाहीने | पञ्चविंशति कलशैः स्नपनम्, विशेषार्चनम्, शिवमन्त्रेण शताहुतिः | गुळान्नम् |
| 4. | चतुर्थाहे, पञ्चाहे (4-5) अर्चनाहीने | पञ्चाशत् (50) कलशैः स्नपनम् | ----- |
| 5. | 6-10 अहे अर्चनाहीने | 80 कलशैः स्नपनम् | ----- |
| 6. | 11-15 अहे अर्चनाहीने | शिवाग्निपूर्वकं 108 कलशैः स्नपनम् शिखामन्त्रं शताहुतिः च | द्विगुणं पायसान्नम् |
| 7. | 16-30 अहे अर्चनाहीने | 300 कलशैः स्नपनम् हृन्मन्त्रैश्च शतवारं हुनेत्। | क्षीरान्नम् |
| 8. | (1-2) द्विमासार्चनाहीने | सहस्रकलशैः स्नपनम् | ----- |
| 9. | 3-षण्मासार्चनाहीने | सम्प्रोक्षणम् | ----- |

**5. वीरागमे –**

**अजितागमस्य प्रायश्चित्तविधिनामक 76 पटलस्य टिप्पण्यां वीरागमे नित्यपूजाविहीने इत्थं प्रायश्चित्तं प्रोक्तम् -**

नित्यार्चनाविहीने तु शान्तिहोमं तु कारयेत्।
सन्ध्यातिक्रमणे चैव द्विगुणं पूजयेत्ततः।।
संध्यायाः द्वित्रये हीने पञ्चगव्याभिषेचनम्। शान्तिहोमं ततः कुर्यात्संख्यया पूजयेच्छिवम्।
एकाहे त्रियहे वापि पञ्चाहे वापि हीनके।।
शान्तिहोमं ततः कुर्यात्स्नपनं तत्र कारयेत्। दिशाहोमं चार्धमासे स्नपनं चैव कारयेत्।।
इत ऊर्ध्वं तु मासे स्याजलसम्प्रोक्षणं कुरु। स्थिरलिङ्गं इदं प्रोक्तं चललिङ्गे ह्यतः शृणु।।
एकाहादिविहीने तु द्विगुणं पूजयेत्ततः। त्रिंशात्तु दिवसादूर्ध्वं स्नपनं कारयेत्ततः।।
षण्मासात्परतो विप्र जलसंप्रोक्षणं कुरु। [5] इति।

**स्थिरलिङ्गस्य नित्यपूजा हीने इयं प्रक्रिया -**

1. नित्यार्चनविहीने - शान्तिहोमम् आचरेत्।
2. सन्ध्यापूजा अतिक्रान्ता चेत् - तत्र द्विगुणं पूजयेत्।
3. द्वि-त्रिसन्ध्यादिपूजाहीने - पञ्चगव्येन अभिषेचयेत्। शान्तिहोमं तत्र कृत्वा, विशेषेण शिवं पूजयेत्।
4. एकाहे त्र्यहे पञ्चाहे वा पूजाहीने – शान्तिहोमम् कुर्यात्। ततः आचार्येण स्नपनं कारयेत्।

---

[5]. अजितागमस्य तृतीयभागे, 76 पटलस्य प्रायश्चित्तपटलटिप्पण्यां, पुटः 170

5. अर्धमासे पूजाहीने - दिशाहोमं हुत्वा तत्रैव देवस्य स्नपनं कारयेत्।
6. अर्धमासादूर्ध्वं नित्यपूजाहीने - जलसंप्रोक्षणम् अवश्यं करणीयम्। एषा स्थिरलिङ्गस्य प्रक्रिया। अथ चललिङ्गस्य पूजाहीने तु इयं प्रक्रिया -
7. एकाहपूजाहीने तु - द्विगुणं पूजयेत्।
8. त्रिंशात् दिवसादूर्ध्वं पूजाहीने - स्नपनं कारयेत्।
9. षण्मासात् परतः पूजाहीने तु – जलसम्प्रोक्षणं कुर्यात्।

| वीरागमे नित्यपूजाविहीने शान्तिहोमं कुर्यात्। | | |
|---|---|---|
| **क.सं.** | **निमित्तम्** | **प्रायश्चित्तम्** |
| **स्थिरलिङ्गस्य विषये** | | |
| 1. | सन्ध्यातिक्रमणे | अन्यसन्ध्यायां द्विगुणार्चनम् |
| 2. | द्वि-त्रिसन्ध्यायां अर्चनाहीने | पञ्चगव्येन अभिषेकः, शान्तिहोमः, संख्यया पूजा च |
| 3. | स्थिरलिङ्गे एकाहादिहीने | द्विगुणार्चनम् |
| 4. | 1,3, 5 अहे हीने | शान्तिहोमः, स्नपनम् |
| 5. | 6-15 अहे (अर्धमासे) अर्चनाहीने | दिशाहोमः, स्नपनञ्च |
| 6. | 16 अहादूर्ध्वम् अर्चनाहीने | जलसम्प्रोक्षणम् |
| 7. | 30 दिवसादूर्ध्वम् अर्चनाहीने | स्नपनम् |
| 8. | 6 मासात् परतः अर्चनाहीने | जलसम्प्रोक्षणम् |
| **चललिङ्गस्य विषये** | | |
| 1. | एकाहपूजाहीने तु - | द्विगुणं पूजयेत्। |
| 2. | त्रिंशात् दिवसादूर्ध्वं पूजाहीने - | स्नपनं कारयेत् |
| 3. | षण्मासात् परतः पूजाहीने तु - | जलसम्प्रोक्षणं कुर्यात् |

**6. संतानसंहितायाम् –**

**अजितागमस्य प्रायश्चित्तविधिनामक 76 पटलस्य टिप्पण्यां सन्तानसंहितायां नित्यपूजाविहीने इत्थं प्रायश्चित्तं प्रोक्तम् -**

> नित्यार्चनाविहीने तु प्रायश्चित्तं शृणु प्रिये। स्थिरलिङ्गार्चने हीने स्नपनं तत्र कारयेत्।।
> सप्तरात्रात्परं देवि जलसंप्रोक्षणं भवेत्।चललिङ्गेऽर्चनाहीने द्विगुणं पूजयेत्ततः।।
> मासादुपरि हीने तु स्नपनं तत्र कारयेत्। षण्मासादुपरिष्टात्तु जलसंप्रोक्षणं भवेत्।।
> प्रतिमेष्वेवमेवं स्यात्स्नपनं प्रोक्षणं भवेत्।[6] इति।

1. नित्यार्चनाहीने प्रायश्चित्तं विधीयते। स्थिरलिङ्गस्य अर्चनाहीने स्नपनं तत्र कर्तव्यम्। चललिङ्गस्य पूजालोपे - तत्र द्विगुणेन पूजयेत्।
2. सप्तरात्रात् परमर्चनाहीने - जलसंप्रोक्षणं तत्र आचरेत्।
3. मसादादुपरि पूजालोपे - स्नपनं तत्र आचरेत्।
4. षण्मासापर्यन्तं तदूर्ध्वं च नित्यपूजाहीने - तत्र जलसंप्रोक्षणं कुर्यात्।

---

[6]. अजितागमस्य तृतीयभागस्य 76 तमपटलस्य प्रायश्चित्तविधेः टिप्पण्यां पुटः 170

प्रतिमेष्वपि एवमेव स्यात् स्नपनं प्रोक्षणं भवेत्।।

इति शैवागमेषूक्तरीत्या नित्यपूजाविहीने प्रायश्चित्तं किमिति यथामति निरूपितम्।

मह्यमेतादृशमवकाशं कल्पितवद्भ्यः गुरुभ्यः प्रणामाञ्जलिपुरस्सरं धन्यवादान् निवेदयन् विरमामि।।

## आधारग्रन्थसूची


1. अजितागमः – भाग-3, Editor – Dr. N.R. Bhatt, © Istitut Francais, Pondichery, 1991 (ISSN: 0073-8352), Impression: Sri Aurobindo Ashram, Pondichery.
2. कारणागमः (पूर्वभागे चरमसम्पुटम्) – प्रधानसम्पादकः – आचार्य का.ई. देवनाथन्, कुलपतिः श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपति – 2014